Gyanshauryam, International Scientific Refereed Research Journal
© 2021 GISRRJ | Volume 4 | Issue 1 | ISSN : 2582-0095

# स्वातन्त्र्योत्तरसंस्कृतकथासाहित्ये भारतीय-शिक्षाव्यवस्था



**Debashish Natta**
Assistant Professor,
Department of Sanskrit, Balurghat College (W.B)

**Article Info**
Volume 4 Issue 1
Page Number: 65-74

**Publication Issue :**
January-February-2021

**Article History**
Accepted : 15 Jan 2021
Published : 30 Jan 2021

**सारांशः** – वर्तमाने विज्ञानप्रविधेः युगे समग्रविश्वे आधुनिकतायाः प्रभावः दृश्यते। अस्याः आधुनिकतायाः प्रभावेन परम्परागत-भारतीयमूल्येषु, शिक्षाव्यवस्थासु, सामाजिक-संस्थासु, सामाजिक-संरचनासु च अत्यधिकं परिवर्तनं सञ्जातम्। अस्याः परिवर्तित-मानसिकतायाः फलस्वरूपं हिंसा स्वार्थपरता च क्रमशः वर्धते। भारतीयदर्शनस्य मूलमन्त्रः, जीवप्रेमः, करुणा, परोपकारः, विश्वबन्धुत्वभावना प्रभृतयः लुप्तप्रायाः इति परिलक्ष्यते। सर्वत्र अराजकता व्याप्तेति दृश्यते। अस्याः दुरावस्थायाः प्रमुखकारणं भवति साम्प्रतिकी विश्रृङ्खलिता दुर्नीतिपरायणा, अनियन्त्रिता, भ्रष्टाचारयुक्ता च शिक्षाव्यवस्था। सम्प्रति शिक्षापेक्षया धनस्य महत्त्वमस्त्यधिकम्। वर्तमाने सामाजिक-परिवर्तनेन सह जीवनशैल्याम् आचार-व्यवहारेष्वपि च परिवर्तनं सञ्जातम्। अतः परिवर्तितेऽस्मिन् परिवेशे विविधशिक्षाप्रतिष्ठानेषु आवश्यकतानुसारं व्यवहारिकी, प्रायोगिकी, उपयोगी च शिक्षा-प्रणाली भवेदिति कामये। शिक्षयैव समाजे शान्ति-सौहार्द-मित्रतादिभावनाः जाग्रताः भवन्ति। राष्ट्रस्य उन्नतये मानवतायाः उर्ध्वगामिविकासाय च शिक्षैव आसीत् साधिका। किन्तु शिक्षायाः तद्रूपं सम्प्रति परिवर्तितम्। संसारम् उचितदिशाप्रदानकारिण्याः अस्याः शिक्षायाः या दुर्दशा अधुना अस्ति तदेव साम्प्रतिक-संस्कृतकथाकारैः तेषां कथाभिः प्रदर्शिता। पुनः कथं समुचितशिक्षा, सुश्रृङ्खलित-समाजव्यवस्था, व्यक्तिस्वतन्त्र्यता प्रभृतयः प्रतिस्थापनीयाः इत्येतेष्वपि विषयेषु स्वातन्त्र्योत्तर-संस्कृतकथाकारैः प्रतिनियतं चर्चा क्रियते एव।

**मूलबिन्दवः** – शिक्षा-व्यवस्था, स्त्रीशिक्षा, गुरुमहत्त्वम्, गुरुशिष्य-परम्परा, शिक्षायाः दुर्दशा।

**Copyright :** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

भारतीय-संस्कृतौ 'शिक्षा' इति एकं महत्त्वपूर्णं साधनमस्ति। संस्कृतेः निर्माणाय, संरक्षणाय, प्रसाराय च शिक्षायाः अत्यधिकं महत्त्वमस्ति। प्राचीनभारते अलिखित-साहित्यस्य संरक्षणं शिक्षाद्वारैव कृतमासीत्। सहस्त्रवर्षादनन्तरमपि प्राचीनभारतीय-संस्कृतिः जीवितास्ति, यतोहि शिक्षायाः परम्परा प्राचीनकालादेव वर्तमानसमयपर्यन्तं निरन्तरतया प्रचलिता वर्तते। प्राचीनभारतीय-शिक्षायाः स्थायिमूल्यमासीत् तथा च राजनीतिकोत्थान-पतनेनापि शिक्षाव्यवस्थायां कोऽपि प्रभावो नासीत्। यतोहि प्राचीनभारतीयशिक्षा उद्देश्यपूर्णासीत्, यस्याः जीवनेन सह निकटसम्बन्धः चासीत् । तत्कालीनशिक्षायाः उद्देश्यं केवलं भौतिकोन्निः इति न, अपितु आत्मविश्वासः, व्यक्तित्वस्य पूर्णविकासः, नैतिकविकासश्चासीत्। भारतीयशिक्षायाः इतिहासः अतिप्राचीनः वर्तते। अतः काले काले राजनीतिक-सामाजिक-आर्थिक-धार्मिकाः च याः घटनाः घटिताः, तेन भारतीय-शिक्षायां संस्कृतौ च आमूलपरिवर्तनं जातम्। अनेन नवीनयुगस्य सूचना जाता। प्रत्येकयुगस्य काश्चन विशिष्टाः शैक्षिकरीतयः आवश्यकताः च भवन्ति। यस्य परिणामस्वरूपं शिक्षायाः उद्देश्येषु स्वरूपेषु च परिवर्तनं जातम्।

**शिक्षा-व्यवस्था –** समाजे सम्मानपूर्वकं जीवितुं शिक्षायाः अत्यधिकं महत्त्वमस्ति। शिक्षया व्यक्तिः धनं मानञ्चोभयं प्राप्तुं शक्नोति। किन्तु शिक्षाभावे कुलीनपरिवारे जन्म लब्ध्वापि व्यक्तिः सम्मानपूर्वकं जीवनं जीवितुं नैव शक्नोति। 'अकिञ्चनस्यौदार्यम्' इति कथायां दृश्यते यत् अर्जुनसिंहः कुलिनोऽपि अशिक्षायाः कारणेन भृत्यस्य कार्यं करोति –

"कुलिनोऽप्यहं शिक्षादीक्षाविरहितं स्वस्य कौटुम्बिकस्थितिवशात् जीविका वृत्तिमुपार्जितं कैशोरे वयस्येव मोहमयीं गतोऽत्र रेलमन्त्री भोजनालये भृत्यत्वं निर्वहामि"।[i]

केचन धनीवर्गीयजनाः शिक्षां निजसम्पत्तिरूपेण मन्यन्ते। किन्तु अद्यापि शिक्षा कस्यापि वर्गविशेषस्याधीने नास्ति। कस्यापि निर्धनपरिवारस्य बालकः शिक्षायाः अवसरं प्राप्नोति। सः उत्तमोत्तम-शिक्षाग्रहणं कर्तुं शक्नोति। 'अपूर्वस्त्यागः' इति कथायां गिरीशकुमारः यदा लक्ष्मीचन्द्रस्य साहाय्येन अवसरं प्राप्नोति तदा सोऽपि स्वप्रतिभाबलेन बी. ए. परीक्षां लिखितवान् –

"एकस्यां पाठशालायां पाठयितुं प्रवेशितः स तदीयं सकलमध्ययनं द्वाभ्यामेव वर्षाभ्यां पर्यसमापयत्। ततः सः हाईस्कूले तदनु महाविद्यालये प्रवेशिता स्वकीयया प्रखरया प्रतिभाप्रभया करुणाकुमारेण सहैव बी. ए. परीक्षामुदतरत्"।[ii]

वर्तमाने शिक्षा केवलं पुत्राय न दीयते, अपितु कन्यायाः कृतेऽपि शिक्षा अत्यन्तं महत्त्वपूर्णा वर्तते। यतोहि शिक्षा केवलं परिवारस्य भरणपोषणार्थं इति न, अपितु आत्मविश्वासं वर्द्धयितुं आत्मनिर्भरञ्च भवितुमत्यन्तावश्यक्यस्ति। अतः पुत्रेण साकं कन्यायाः कृतेऽपि शिक्षा आवश्यकी वर्तते। 'शुक्लधान्यम्' इति कथायां पुत्रस्य कन्यायाः च शिक्षायां समानं ध्यानं दीयते – "पुत्रं शिक्षितमकारयम्। कन्यां च सम्यक् अपाठयम्"।[iii]

शिक्षाक्षेत्रे गुरोः यथा महत्त्वं वर्तते, तथैव महत्त्वमस्ति पुस्तकालयस्यापि। यत्र प्रत्येक-क्षेत्रसम्बन्धितानि ज्ञानवर्धकानि पुस्तकानि संगृहीतानि सन्ति। येन विद्यार्थी अधिकाधिकीं शिक्षां प्राप्तुं शक्नोति। 'सिद्धो रासायनिकः' इति कथायां पुस्तकालयस्य चित्रमेवं चित्रितमस्ति –

"तत्र पुस्तकालये विविधभाषाणामनेकेषां विभिन्नविषयाणां च मुद्रितान्यमुद्रितानि हस्तलिखितानि पुस्तकानि, दुर्लभान् ग्रन्थान्, शिलालेखान्, प्रमाणपत्राण्युपाधिपत्राण्यभिनन्दनपत्राणि, विविधानि विचित्राणि चालोकयालोक्य वयं चकितचकिता इवाभूम"।[iv]

कस्यापि संस्थायाः विद्यालयस्य वा उन्नतिः छात्राणां परिश्रमस्योपरि निर्भरशीलः भवति। छात्राः इच्छन्ति चेत् परिश्रमेण सहयोगेन च स्वसंस्थामग्रे नेतुं शक्नुवन्ति। एतदेव 'स्पर्धा' इति कथायां वर्णितमस्ति यथा –

"तत्रैवास्माकं छात्रालयेऽध्ययनपरो विद्यामुपलभमानोऽथ शास्त्रेषु व्युत्पन्नः स्वस्य सहपाठिनां छात्राणां छात्रालयस्य च सेवार्थं महान्तमुद्योगं कृत्वा सा संस्थां महतीमभ्युन्नतिं निनाय"।[v]

उपर्युक्तालोचनया विविधैश्चोदाहरणैः ज्ञायते यत् वर्तमाने शिक्षायाः महत्त्वं निर्धनस्य, धनवतः, पुत्रस्य, पुत्र्याः च सर्वेषां कृते अस्त्येव। किन्तु प्रिशिक्षणार्थं उत्तमेकस्य गुरोः पुस्तकालयस्य चावश्यकता भवति। अनयोः द्वयोः सहयोगेन व्यक्तिः सरलतया सफलतां प्राप्नोति इति।

**स्त्रीशिक्षा** – वैदिककाले शिक्षाक्षेत्रे नारीणां समानाधिकारः आसीत्। अतः तदानीम् अपाला, घोषा, गार्गी प्रमुखविदुषी-नार्यः आसन्। वैदिककालेऽपि पितरौ स्वपुत्रीणां शिक्षाविषये ध्यानं ददतः स्म। 'अपाला आत्रेयी' इति कथायां अत्रिमुनिना स्वपुत्र्याः अपालायाः शिक्षायां ध्यानं दीयते –

"मामकीन वाह्यं वपुनिर्मलीकर्तुमक्षमः पितृदेवो मम शिक्षादीक्षयोः स्वदृष्टिपातं कृतवानो सस्नेहं मम पाठनमारब्धवान् पितुर्लोकोत्तराऽध्यापनकुशलता, इत्येतानि सर्वाणि मिलित्वा ममाध्ययने कृतवन्ति प्रभूतं साहाय्यम्"।[vi]

मध्ययुगे अस्यां विचारधारायां किञ्चित् परिवर्तनमागतम्। यतोहि कालेऽस्मिन् स्त्रीणामुपरि मुघलानां अत्याचारकारणात् पर्दाप्रथायाः प्रारम्भः जातः तथा च नारीणां जीवनमेकस्मिन् निर्दिष्टस्थाने सीमितमभवत्। वर्तमाने स्त्रीशिक्षाविषये जनाः

अधिकजागरूकाः सन्ति। इदानीं नार्यः सर्वोच्चशिक्षाग्रहणं कृत्वा समाजे सम्मानीयं स्थानं प्राप्तुं प्रयासरताः दृश्यन्ते। अधुना जनाः पुत्रेण सह कन्यामपि शिक्षयितुं सर्वदा तत्पराः। 'शुल्कधान्यम्' इति कथायां पुत्रकन्ययोः शिक्षायां समानरूपेण ध्यानं प्रदीयते –

"पुत्रं शिक्षितमकारयम्। कन्यां च सम्यक् अपाठयम्" ।[vii]

'अपराजिता' इति कथायामपि लक्ष्मणपालस्य एकः पुत्रः षड्कन्याः च सन्ति। तासु षड्कन्यासु तिसृणां विवाहः जातः तथा अपरतिस्रः कन्याः पुत्रेण सह शिक्षाग्रहणं कुर्वन्ति –

"विजया स्नातकीयकक्षामुत्तीर्य गृहे एवं स्थिता आसीत् अपि च मृदुला द्वादशकक्षायां श्यामला एकादश्यां कनिष्ठो दिनेशश्च दशम्यां कक्षायां पठन्ति स्म"।[viii]

'सापराधः' इति कथायामपि विपिन विहारी तस्य परिवारे अधिकसदस्यसंख्याकारणेन व्ययमपि अधिकं सत्येपि स्वकन्यानां शिक्षायां विघ्नं नैवोत्पादयति -

"वंशवृद्धिश्च मे जायमानास्ते। ममैका दुहिता विश्वविद्यालये स्नातकोत्तरश्रेण्यामधीयमानास्ते द्वितीया वर्षेऽस्मिन् स्नातकपरीक्षां दातुमिच्छति। अन्यास्तिस्त्रः कन्याः पञ्चपुत्राश्च मे प्रारम्भिक-माध्यमिकपाठशालाधीयानां वर्तते"।[ix]

'पायश्चित्तम्' इति कथायामपि पण्डितः वीरेश्वरः तस्य एकमात्रां पुत्रीं सावित्रीं स्नातकपरीक्षायावत् पाठयति –

"पण्डितो वीरेश्वरः स्वकीयामेकमात्रां पुत्रीं सावित्रीं स्नातकपरीक्षापर्यन्तमपाठयत्"।[x]

इदानीं न केवलं नगरेषु, ग्रामीणजनाः अपि स्त्रीशिक्षाविषये जागरूकाः सन्ति। अतः तेऽपि स्वकन्याः उच्चशिक्षायां शिक्षयितुं सदैव प्रयत्नं कुर्वन्ति। 'विंशद्विश्वाविडम्बना' इति कथायां राजेश्वरी स्वग्रामं स्थित्वैव प्रारम्भिकशिक्षाग्रहणं करोति, किन्तु ग्रामे माध्यमिक-विद्यालयः नास्तीति कारणेन सा तस्याः इच्छा सत्येपि उच्चशिक्षाग्रहणे असमर्था भवति –

"मम नाम राजेश्वरी अस्ति। अहमध्ययने तीक्ष्णाऽऽसम् किन्तु ग्रामीणप्रारम्भिकपाठशालातः अग्रे गन्तुमसमर्थासम्। यतः समीपे कोऽपि उच्चतरमाध्यमिकविद्यालयो नासीत्"।[xi]

वर्तमाने माता-पिता स्वल्पव्ययेन लघुकुटीरं स्थित्वा जीवनयापनं कृत्वापि स्वपुत्रं पुत्रीञ्च शिक्षयितुं सर्वदा प्रयतते। 'चञ्चा' इति कथायां सोभा स्वपितृभ्यां सह स्वल्पपरिसरस्थानं स्थित्वापि इतिहासविषये एम्.ए. परीक्षामुत्तीर्णवती –

"सोभा तस्मिन् लघुकुटिरे नीराजनशिखेव विरराज। इदानीमेकविंशे वसन्ते विद्यमाना सा विश्वविद्यालये मध्यकालीनमितिहासविषयमवलम्ब्य एम्.ए. पूर्वार्धपरीक्षामुतर्तुं प्रयतमानाऽऽसीत्"।[xii]

सम्प्रति स्त्रीशिक्षायाः अत्यधिकं महत्त्वमस्तीत्येतस्य कारणमस्ति यत् स्त्रियः समाजे सम्मानीयं स्थानं प्राप्तुं सर्वदा प्रयत्नशीलाः वर्तन्ते, तथा च शिक्षाग्रहणात् पश्चात् पुरुषैस्सह समानरूपेण अग्रे गन्तुं सिद्धाः सन्ति। पुनश्चार्थलाभाय अपि ताः शिक्षाग्रहणं कुर्वन्तीति। 'कपटस्य नियतिः' इति कथायां कल्पना स्नातकोत्तरकक्षायाः अनन्तरं समाजकल्याणविभागे मुख्यसेविकारूपेण कार्यं करोति –

"एम्.ए. करणानन्तरं कल्पना समाजकल्याणविभागे मुख्या सेविकाऽभवत्"।[xiii]

सम्प्रति माता-पिता स्वपुत्रीं उच्चशिक्षायां शिक्षितां करोति। येन कन्यायाः विवाहः उच्चशिक्षित-परिवारे भविष्यति इति पित्रोः चिन्तनमस्ति। यतोहि अधुना शिक्षितव्यक्तिः शिक्षितकन्यामेव विवाहं कर्तुमिच्छति। 'सहयात्री' इति कथायां यदा श्रीनिवासस्य शान्तिना सह विवाहस्य चर्चा भवति तदा श्रीनिवासः कथयति –

"शिक्षिता तु आस्ते। बी.ए. परीक्षां ददाति"।[xiv]

एतदेव मर्यादा इति कथायां रेवत्याः पिता कथयति –

"एकैव सा मत्सुता। किन्तु विनाऽध्ययनं तस्याः साधयसि कुले विवाहो न सम्भाव्यः, अतः सा पठतु, परीक्षामुत्तरतु चेति वयं वाञ्छामः"।[xv]

शिक्षाक्षेत्रे प्रोत्साहं प्राप्नोति चेत् कन्या उत्तमङ्कान् संप्राप्य अग्रे गन्तुं शक्नोति। एतदेव 'पञ्जरशुकः' इति कथायां दृश्यते यत् –

"ज्योत्स्नापि स्फुरितबुद्धि वैभववती सुन्दरी कन्याऽऽसीत्.....। शनैः शनैः माध्यमिकीं कक्षामुत्तीर्य स्नातककक्षासु प्रविष्टा सर्वथा प्रथमश्रेण्यामुत्तीर्णाऽभवत् सा"।[xvi]

अधुना स्त्रीशिक्षायाः क्षेत्रे मानवानां विचारधारासु परिवर्तनं जातम्। अभिभावकानां दृष्ट्या अद्य पुत्रस्य कृते शिक्षायाः यथा महत्त्वं वर्तते, तथैव कन्यायाः कृतेऽप्यस्ति। शिक्षाक्षेत्रे पुत्रीणां कृते कश्चिदपि सहयोगः क्रियते चेत् ताः इतोऽपि उन्नतिं कर्तुं शक्नुवन्ति। जनानामियं परिवर्तनशीला विचारधारा स्वातन्त्र्योत्तर-संस्कृतकथाकारैः स्वीयासु कथासु उत्तमरीत्या प्रस्तूयते।

**शिक्षाक्षेत्रे गुरोः महत्त्वम् –**

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः।
गुरुः साक्षान्परब्रह्म तस्मै श्रीगुरवे नमः।।[xvii]

साक्षान्परब्रह्म इति संज्ञया गुरुः विभूषितोऽस्ति। भारतीय-संस्कृतौ गुरुशिष्य-परम्परा अतिप्राचीनकालादेव प्रचलिताऽस्ति। शिष्येण कृता गुरुसेवा परोक्षरूपेण आशीर्वादस्वरूपं प्रतिफलिता भवति। शिष्याः अज्ञानवशतः गुरुसेवायाः फलं प्रत्यक्षरूपेण द्रष्टुमिच्छन्ति, किन्तु तदनुरूपं प्रत्यक्षरूपेण शिष्यैः फलं न प्राप्यते चेत् गुरुं प्रति विद्वेषभावः प्रदर्श्यते। 'कोटरम्' इति कथायां गुरोः चक्रपाणेः समक्षे जलधरस्य सेवावृत्तिनिमित्तं साक्षात्कारः भवति, किन्तु तथापि जलधरेण सेवावृत्तेः अवसरः नैव प्राप्यते चेत् गुरुं प्रति अनुचितं वाक्यं कथ्यते –

"यदा सः गुरुमपश्यत् तदा अगर्जत -
किं दीर्घसेवया इदमेव फलम्? भवान् संकीर्ण.....भवान् स्वार्थपरः"।[xviii]

शनैः शनैः समयातिक्रान्ते वरिष्ठैकाधिकारिरूपेण यदा जलधरः प्रतिष्ठितः भवति तदा तस्य विश्वासः भवति यत् गुरोः आशीर्वादेनैव प्राप्तमिदं फलं मया –

"गुरोः आकृतिमपि मानसमानेतुं न शक्यते सम्प्रति। किन्तु विश्वासे आशीर्वादः फलितः। जलधर सेवावृत्या अद्यत्वे वरिष्ठः अधिकारी"।[xix]

परिश्रमी-छात्रस्योपरि गुरोः आशीर्वादः सदैव भवति। गुरुः सम्पूर्णज्ञानं सर्वदा सत्पात्राय दातुमिच्छति। उक्तमपि यत्-विनयसम्पन्नः सदाचारी-शिष्यः सर्वथा गुरुं प्रसन्नं कृत्वा दुर्लभज्ञानमपि सुलभं कर्तुं शक्नोति। 'पितामही मिलिता' इति कथायां त्रिलोचनः अपि परिश्रमी विनयी चासीत्। अतः तेन गुरुभ्यः स्नेहं ज्ञानञ्च प्राप्यते –

"तस्य परिश्रमित्वात् गुरुजनानाम् अपि तस्मिन् महान् स्नेहः आसीत्। ते आत्मीयं सर्वम् अपि ज्ञानं तस्मिन् सत्पात्रे निहितवन्तः। सत्यम् एव एकः विनयसम्पन्नः सदाचारी शिष्यः गुरुं सर्वथा प्रसन्नं कृत्वा ततः दुर्लभाम् अपि विद्यां सुलभते"।[xx]

वर्तमाने सामाजिक-परिवर्तनेन सह जीवनशैल्याम् आचार-व्यवहारेष्वपि च परिवर्तनं सञ्जातम्। अतः परिवर्तितेऽस्मिन् परिवेशे विविधशिक्षाप्रतिष्ठानेषु आवश्यकतानुसारं व्यवहारिकी, प्रायोगिकी, उपयोगी च शिक्षा-प्रणाली भवेदिति कामये। 'कालकण्ठः' इति कथायां विषयेऽस्मिन् चर्चा क्रियते –

"गुरुकुलस्य परिसरे स्थित्वा समाजस्य गतिविधि भवान् विस्मृतवान्। यथा समाजस्य आवश्यकता तथा शिक्षा दातव्या तथा च स्नातका निर्मातव्या"।[xxi]

गुरुः शिष्यान् प्रशिक्षणसमये सर्वदा उत्तमरीत्या पाठयितुं प्रयत्नं करोति। तस्य शिष्याः योग्याः भवन्तु तथा च तस्य प्रशिक्षणं सफलं भवतु इति गुरुः सर्वदा इच्छति। शिष्याणां सफलतायाः समाचारः यदा गुरुणा प्राप्यते तदा गुरुणा महदानन्दः हर्षश्च अनुभूयते। एतदेव 'राष्ट्रनिर्माता' इति कथायां एकस्मिन् वक्तव्ये दृश्यते यथा –

"मम शिष्याः सर्वक्षेत्रेषु कर्मसम्पृक्तः वर्तन्ते"।[xxii]

यः शिक्षकः छात्राणां सविधे निजादर्शं प्रस्तौति, सः न केवलं छात्रैः अपितु सर्वकारेणापि सम्मानितो भवति। यथा 'पितामही मिलिता' इति कथायां इन्दुमती आदर्शशिक्षिकारूपेण परिचिता भवति तथा च शिक्षकदिवसे सम्मानिता अपि भवति –

"विदुषी इन्दुमती अधुना एका आदर्शशिक्षिका मन्यते स्म। राज्यसर्वकारेण अपि सा शिक्षकदिवसे सम्मानिता आसीत्"।[xxiii]

यः गुरुः स्वशिष्येभ्यः समयानुकुलं श्रेष्ठशिक्षां प्रददाति सः आजीवनं शिष्यैः सम्मानितो भवति। 'दम्भज्वरः' इति कथायां वसन्ताधिकारिणः गुरुः यदा बहुदिनेभ्यः पश्चात् नगरमागच्छति तदा सः स्वयमेव स्वगुरुमानेतुं रेलस्थानकं प्रति गच्छति –

"अस्य संभागीयायुक्तस्य तदा गुरुरभूद् यदा सः विश्वविद्यालये पठति स्म। अन्तः स्वगुरुं स्वगृहे नेतुं सोऽयमायुक्त स्वयमत्र समागतः"।[xxiv]

**शिक्षायाः दुर्दशा** – वर्तमानसमये शिक्षायाः महत्त्वमेव नास्ति। अधुना शिक्षाक्षेत्रे सहस्राणि प्रमाणपत्राणि भवन्ति चेदपि लाभः नास्ति। प्रतिदिनं शिक्षायाः अवक्षयं भवति। सम्प्रति शिक्षापेक्षया धनस्य महत्त्वमस्त्यधिकम्। 'अभ्यागतः' इति कथायामेकः व्यक्तिः द्वादशवर्षं कठिनपरिश्रमं कृत्वा अनेकानि प्रमाणपत्राणि प्राप्य एकस्यां पाठशालायां नियुक्तो भवति। किन्तु तथापि तं मूर्खमित्युक्त्वा ततः निष्काशयति –

"मया तु द्वादशवर्षाणि अधीत्य प्रमाणपत्रमर्जितम्। ततः काञ्चन अनुरुध्य पाठशालायां नियुक्तोऽभवम्। अपर आगत्य मां वहिष्कृतवान् अहं मूर्ख.......पाठयितुं न शक्नोमि इति आक्षिप्य। तदनु अनुभूतम्, प्रमाणपत्रेण मूर्खत्वं क्रीतं मया"।[xxv]

व्यवसायां शिक्षाद्वारा इदानीं कोऽपि लाभः न भवति। स्वकार्यक्षेत्रे प्रगत्यर्थं स्वार्थिकस्थितिं सुदृढीञ्च कर्तुं चौर्यभ्रष्टाचारादिनिकृष्टं वर्जितञ्च साधनं प्रयुज्यते व्यक्तिभिः। अनेन शिक्षिताशिक्षितयोः कोऽपि भेदः न दृश्यते। 'प्रतिष्ठा' इति कथायां ईदृशस्थितेः व्यङ्गात्मकविषयः प्रस्तूयते कथाकारेण –

"किं भविष्यति ? निरीक्षणम्......? अङ्कदानम्.....अनेन किं भविष्यति ? कश्चित् चोरो, भ्रष्टाचारी तस्करो वा भवेत्। एतदर्थं निष्कारणं कथं श्रमः ? सर्वे उत्तीर्णा इति लिखित्वा प्रयच्छ"।[xxvi]

शिक्षयैव समाजे शान्ति-सौहार्द-मित्रतादिभावनाः जाग्रताः भवन्ति। राष्ट्रस्य उन्नतये मानवतायाः उर्ध्वगामिविकासाय च शिक्षैव आसीत् साधिका। किन्तु शिक्षायाः तद्रूपं सम्प्रति परिवर्तितम्। वर्तमानशिक्षायाः परिवर्तितमिदं रूपम् 'उपलपथे' इति कथायां दृश्यते –

"शिक्षा हि अद्यत्वे अपराधस्य आधारिका....विरोधस्य वर्धकी....युद्धस्य च बोधिनी"।[xxvii]

वर्तमाने शिक्षायाः शिक्षकस्य च स्वरूपं परिवर्तितं जातम्। इदानीं प्राचीनकालसदृशः धर्मज्ञः गुरुः प्रायः नास्ति, तथैव धर्मयुक्तशिक्षां प्रदातुं गुरुकुलोऽपि नास्ति। अतः अधुना शिक्षकाः मारणनीतिं प्रसारयन्ति तथा विश्वविद्यालयाः वैज्ञानिकानां स्थाने असुराणां जन्म ददति। 'चन्द्रशाला' इति कथायां शिक्षकशिक्षालययोः अस्मिन्नेव विषये दृष्टिपातः क्रियते कथाकारेण –

"कर्णधाराः कदाचित् तेषामध्यापको मारणनीतिं प्रसरति चेत् क्वचित् छात्र मारणनीतिः प्रवर्तित।....। विश्वविद्यालयद्वारा वैज्ञानिका वा असुरा वा निर्मीयन्ते इति विदुरो ज्ञातुं न प्रभवति। अधिकारिणोऽत्र राक्षसा वा साक्षरा वा इत्यपि अवगन्तुं न शक्नोमि"।[xxviii]

अधुना शिक्षा सर्वनिम्नस्तरे आपतिता वर्तते। कुत्रापि निष्ठावान् शिष्यः यथा नास्ति, तथैव उचितज्ञानदाता गुरुः अपि न दृश्यते। गुरुशिष्याभ्यां सह शिक्षायाः स्तरः 'निरीक्षणम्' इति कथायां यथार्थरूपेण प्रस्तूयते –

"यत्र च शास्त्राणि पुस्तकालयेष्वेव न तु गुरुमुखेषु.....प्रशंसा केवलमात्मरवपनेषु"।[xxix]

इदानीं विद्यालयेषु पाठयितुं समयः नास्ति। यतोहि ते शिक्षणं स्वकर्तव्यमिति न, अपितु व्यवसायः इति मन्यन्ते। अतः शिक्षकाः विद्यालयेषु छात्रेभ्यः पूर्णशिक्षां नैव प्रददति। अपि च तान् गृहमाहूय पाठयित्वा धनार्जनं कुर्वन्ति। अस्य उदाहरणम् 'अपराजिता' इति कथायां दृश्यते –

"पञ्चवादनवेलातः नववादनपर्यन्तं चतुर्षु गृहेष्वनेकान् बालकान् बालिकाश्च पाठयित्वा सः पर्याप्तमर्जयति स्म"।[xxx]

सम्प्रति विद्यालयेषु शिक्षकानां मध्ये मतपार्थक्यमस्ति। यतोहि प्रत्येकस्मिन् विभागे केचन अध्यापकाः प्राचीनपद्धतिम् अनुसरन्ति, केचन च नवीनविचारधाराम् अङ्गीकुर्वन्ति। अतः छात्राध्यापकेषु आचार-विचाराणां संमिश्रणं दृश्यते। एतदेव 'दिग्भ्रमः' इति कथायां दृश्यते –

"संस्कृतविभागस्य प्राध्यापकाः केचन प्राचीनपद्धत्यनुनायिनः, अपरे नितरामाधुनिकाः एवमेव छात्राः कतिपये.....। यथा हि छात्राध्यापकादीनामाचारविचारेषु संमिश्रता दृश्यते"।[xxxi]

शिक्षा-व्यवस्था एतावत् अधःपतिता अस्ति यत् वर्तमाने द्रोणाचार्यसदृशःन गुरुः अस्ति नहि एकलव्यसदृशः शिष्यः। अधुना शिक्षकः धनार्जनाय शिष्यं पाठयति, तस्योद्देश्यं शिक्षादानं न अपितु धनार्जनम्। उचितशिक्षाभावे अद्य प्रगतिः न अपितु अपराधस्य संख्या क्रमशः वर्धते, या एका महती समस्या वर्तते सम्प्रति।

इत्थं स्वातन्त्र्योत्तर-संस्कृतकथाकाराः शिक्षासम्बन्धितान् प्राचीनमूल्यान् अङ्गीकृत्य सम्यगवगम्य च स्त्रीशिक्षायाः उपरि विशेषबलं प्रदत्तवन्तः। तथैव गुरोः महत्त्वं प्रदर्श्य भारतीय-संस्कृतेः 'गुरुर्देवो भव' इति उदात्त-भावनामपि समादृतवन्तः। वर्तमानकथाकाराः तेषां कथाभिः अस्मान् सम्बोधयन्ति यत् गुरुशिष्ययोः सम्बन्धः अत्यन्तं पवित्रो भवति। एकेन श्रेष्ठगुरुणा स्वशिष्येभ्यः सदैव एतादृशी शिक्षा प्रदीयते, यया एकस्य संगठितराज्यस्य निर्माणं सम्भवति। किन्तु सम्प्रति पाश्चात्य-संस्कृतिः, व्यक्तिस्वतन्त्र्यतायाः अमर्यादा, विश्रृङ्खलिता धारणा प्रभृतिकारणवशात् अस्माकं पावनी गरिमामयी शिक्षा प्रदूषिता वर्तते। संसारम् उचितदिशाप्रदानकारिण्याः अस्याः शिक्षायाः या दुर्दशा अधुना अस्ति तदेव साम्प्रतिक-संस्कृतकथाकारैः तेषां कथाभिः प्रदर्शिता। पुनः कथं समुचितशिक्षा, सुश्रृङ्खलित-समाजव्यवस्था, व्यक्तिस्वतन्त्र्यता प्रभृतयः प्रतिस्थापनीयाः इत्येतेष्वपि विषयेषु स्वातन्त्र्योत्तर-संस्कृतकथाकारैः प्रतिनियतं चर्चा क्रियते एव।

**सहायकग्रन्थसूची –**

1. बीसवीं शताब्दी का संस्कृत लघुकथा-साहित्य : रुचि कुलश्रेष्ठ,परिमल पब्लिकेशन्स,27/28, शक्तिनगर,दिल्ली-110007.

2. आधुनिक संस्कृत कथाएं-स्थिति और प्रवृत्ति : डा. अर्चना तिवारी, पद्मजा प्रकाशन, 57, बसन्त बिहार,झाँसि,इलाहावाद-211019.
3. आधुनिक संस्कृत साहित्य : ऋता चट्टोपाध्याय, प्रग्रेसिभ पाब्लिशार्स, 37A, कलेज स्ट्रीट, कोलकाता-73.
4. अर्वाचीन संस्कृत साहित्य (दिशा एवं दशा) : डा. मंजुलता शर्मा व डा. प्रमोद भारतीय, परिमल पब्लिकेशन्स, 27/28 व 22/3, शक्तिनगर, दिल्ली-110007.
5. भारतवर्षे आधुनिकसंस्कृतसाहित्यम् (विहङ्गमदृष्ट्या परिशीलनम्) : शुभ्रजित् सेनः, संस्कृत पुस्तक भण्डार, 38, विधान सरणी, कोलकाता-700006.
6. समकालीनसंस्कृतसाहित्ये पश्चिमवङ्गस्यावदानम् : नारायणदाश, तुहिना प्रकाशनी, कोलकाता-6.
7. आधुनिक संस्कृत साहित्य : महामहोपाध्याय आचार्य दयानन्द भार्गव, हंसा प्रकाशन, 57, नाटाणी भवन, मिश्र राजाजी का रास्ता, चांदपोल बाजार, जयपुर-302001 (राज.).
8. राङ्गडा : अभिराज राजेन्द्र मिश्र,वैजयन्त प्रकाशन, इलाहाबाद.
9. संस्कृत साहित्य का अभिनव इतिहास : डा. राधावल्लभ त्रिपाठी, विश्वविद्यालय प्रकाशन, चौक वाराणसी-221001.

---

[i] अकिञ्चनस्यौदार्यम् : संस्कृतकथाकुञ्जम्, डा. गणेशराम शर्मा, पृष्ठसंख्या-51

[ii] अपूर्वस्त्यागः : अभिनवकथानिकुञ्जः,श्री रामेश्वर शास्त्री, पृष्ठसंख्या-134

[iii] शुक्लधान्यम् : दिशा-विदिशा, डा. केशवचन्द्रदाशः, पृष्ठसंख्या-59

[iv] सिद्धो रासायनिकः : संस्कृतकथाकुञ्जम्, डा. गणेशराम शर्मा, पृष्ठसंख्या-7

[v] स्पर्धा : संस्कृतकथाकुञ्जम्, डा. गणेशराम शर्मा, पृष्ठसंख्या-135

[vi] अपाला आत्रेयी : अभिनवकथानिकुञ्जः, श्रीदेवकीनन्दन शास्त्री, पृष्ठसंख्या-146

[vii] शुक्लधान्यम् : दिशा-विदिशा, डा. केशवचन्द्रदाशः, पृष्ठसंख्या-59

[viii] अपराजिता : अपराजिता, डा. वीणापाणि पाटनी, पृष्ठसंख्या-1

[ix] सापराधः : राजस्थानस्याधुनिका संस्कृतकथालेखिका, डा. गणेशराम शर्मा, पृष्ठसंख्या-36

[x] प्रायश्चित्तम् : सिद्धेश्वरी वैभवम्, द्वारकाप्रसाद शास्त्री, पृष्ठसंख्या-29

[xi] विंशद्विश्वाविडम्बना : सिद्धेश्वरी वैभवम्, द्वारकाप्रसाद शास्त्री, पृष्ठसंख्या-25

[xii] चञ्चा : राङ्गडा, डा. राजेन्द्र मिश्रः, पृष्ठसंख्या-27

[xiii] कपटस्य नियतिः : सिद्धेश्वरी वैभवम्, द्वारकाप्रसाद शास्त्री, पृष्ठसंख्या-57

[xiv] सहयात्री : अभिनवकथानिकुञ्जः, श्रीधरपन्तः, पृष्ठसंख्या-111

xv मर्यादा : कथा मुक्तावली, देवर्षि कलानाथ शास्त्री, पृष्ठसंख्या-99

xvi पञ्जरशुकः : एकादशी, डा. इच्छाराम द्विवेदी, पृष्ठसंख्या 51-52

xvii श्वेताश्वतरोपनिषद्

xviii कोटरम् : ऊर्मिचूडा, डा केशवचन्द्रदाशः, पृष्ठसंख्या-93

xix कोटरम् : ऊर्मिचूडा, डा केशवचन्द्रदाशः, पृष्ठसंख्या-93

xx पितामही मिलिता : राजकथाकुञ्जम्, डा. नारायण शास्त्री काँकरः, पृष्ठसंख्या-29

xxi कालकण्ठः : : ऊर्मिचूडा, डा केशवचन्द्रदाशः, पृष्ठसंख्या-125

xxii राष्ट्रनिर्माता : राजस्थानस्याधुनिका संस्कृतकथालेखिका, ईश्वरचन्द्र शर्मा, पृष्ठसंख्या-99

xxiii पितामही मिलिता : राजकथाकुञ्जम्, डा. नारायण शास्त्री काँकरः, पृष्ठसंख्या-30

xxiv दम्भज्वरः : कथानकवल्ली, देवर्षि कलानाथ शास्त्री, पृष्ठसंख्या-94

xxv अभ्यागतः : दिशा-विदिशा, डा. केशवचन्द्रदाशः, पृष्ठसंख्या-109

xxvi प्रतिष्ठा : ऊर्मिचूडा, डा केशवचन्द्रदाशः, पृष्ठसंख्या-33

xxvii उपलपथे : दिशा-विदिशा, डा. केशवचन्द्रदाशः, पृष्ठसंख्या-164

xxviii चन्द्रशाला : दिशा-विदिशा, डा. केशवचन्द्रदाशः, पृष्ठसंख्या-133

xxix निरीक्षणम् : एकादशी , डा. इच्छाराम द्विवेदी, पृष्ठसंख्या-24

xxx अपराजिता : अपराजिता, डा. वीणापाणि पाटनी, पृष्ठसंख्या-1

xxxi दिग्भ्रमः : कथानकवल्ली, देवर्षि कलानाथ शास्त्री, पृष्ठसंख्या-60